श्रीशारदाम्बा स्तवनम्

{॥ श्रीशारदाम्बा स्तवनम् ॥}

ॐ पीठे काञ्चनकल्पिते सुरुचिरे रत्नप्रभाभास्वरे
नानालङ्कृतिमण्डिते विलसितां स्मेराननां सुन्दरीम् ।
दीव्यद्रत्नकिरीटकुण्डलधरां शीताम्शुलेखान्विताम्
देवीं शारदनीरदोज्वलरुचिं श्रीशारदाम्बां भजे ॥ १॥

हस्ताग्रे प्रियशारिकां विदधतीं वामेकरे पुस्तकम्
शुभ्रस्फाटिकमक्षसूत्रमपरे हस्ते वहन्तीं च ताम् ।
श्रीशृङ्गाद्रिनिकेतनां सुविमलां शुभ्राम्बरालङ्कृताम्
वन्देऽहं भवतारिणीं भगवतीं भक्तेष्टदां भारतीम् ॥ २॥

आदौ शङ्करदेशिकेन्द्रगुरुणा सम्पूजितां भावये
सेव्यां तस्य परम्परागतमहाशृङ्गाद्रिपीठाधिपैः ।
अद्यापि स्थिरभक्तिभावभरितैः श्रीमद्भिराराधिताम्
विद्यातीर्थयतीश्वरैरभिनवेत्याख्याति पूर्वैः सदा ॥ ३॥

श्रीनाथ त्रिदशाधिनाथ गिरिजानाथादि देवार्चिते
तारानाभसनाथ चारुमकुटे नाथान्यदेवोऽस्ति मे ।
मातस्त्वां न विना परस्त्रिभुवने पोतो भवाम्भोनिधेः
त्रातव्योहमपारघोरदुरित व्राताब्धिमग्नश्चिरात् ॥ ४॥

विप्रास्ते वेदमन्त्रैः तवपदयुगपङ्केजलग्नांतरङ्गाः

झङ्कारैर्विभ्रमन्तो नवसुममधुपानप्रमत्ताश्च भृङ्गाः ।

वृक्षेषूद्गीयमानैर्बहुविधनिनदैः कूजितैस्ते विहङ्गाः

घोषैर्वै सुप्रभातं तव जननि पठन्त्यत्र तुङ्गातरङ्गाः ॥ ५॥

धन्यास्ते भुवि ये वसन्ति विमले शृङ्गाद्रितीर्थे नराः

तुङ्गास्नानविधूतसर्वदुरितास्त्वत्पादसेवारताः ।

धन्यास्तेऽपि विहङ्गभृङ्गशफराः सर्वे चरन्त्यत्रये

मातस्त्वत्पदसन्निधानमहिमावेशाश्च धूळीलवाः ॥ ॐ ॥

Encoded by R. Harshananda harshanand\—16@rediffmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Sharada Stavanam Lyrics in Devanagari PDF
% File name : shAradAstavanam.itx
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : R. Harshananda harshanand_16 at rediffmail.com
% Latest update : April 17, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of

% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website